# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – एप्रिल-२०१९

| | | |
|---|---|---|
| कक्षा–आचार्यप्रथमवर्षम्(SEM- 2) | **प्रश्नपत्रम् – २** | गुणा: - ७० |
| विषय: - नव्यव्याकरणम् | **कोड – CC.4.2.4** | समय: - ११ त: ०२ |
| दिनाङ्क: - ११-०४-२०१९ | सन्दर्भग्रन्थः – परमलघुमञ्जूषा \| | |

.......................................................................................................................

**प्रथमान्विति:**

**प्रश्नः-१** परमलघुमञ्जूषाकारस्य संक्षिप्तं परिचयं लिखित्वा ग्रन्थस्य मङ्गलाचरणं व्याख्यात | **(५)**

**अथवा**

'अष्टौ स्फोटा:' इति ग्रन्थकारोक्तं विवेचयत |

**प्रश्न:-२** ईश्वरीयसंकेतस्य शक्तित्वनिरासपूर्वकम् इतरेतराध्यासमूलकं तादात्म्यस्वरूपं प्रतिपादनीयम् |
**(१०)**

**अथवा**

'सैषा शक्ति: संयोगादिभिर्नानार्थेषु नियम्यते' इति ग्रन्थवाक्यं विश्लेषणीयम् |

**द्वितीयान्विति:**

**प्रश्न:-३** तार्किकमतानुसारं लक्षणा क: पदार्थ:? इति बोधयित्वा गौणी शुद्धा च लक्षणा सोदाहरणं विवेचनीया |
**(५)**

**अथवा**

जहत्स्वार्था अजहत्स्वार्था च लक्षणा विवेचनीया |

**प्रश्न:-४ 'सा च लक्षणा तात्स्थ्यादिनिमित्तिका' इति गन्थपङ्क्ति: विवेचनीया |**
**(१०)**

**अथवा**

**'सति तात्पर्ये सर्वे सर्वार्थवाचका:' इति भाष्यपङ्क्ते: प्रामाण्यात् लक्षणाखण्डं यथाग्रन्थं प्रतिपादयत |**

**तृतीयान्विति**:

**प्रश्न:-५** लक्षणयैव गतार्था व्यञ्जनेति न सा स्वीकार्या' इति यत् तार्किका: आहु: तस्य खण्डनं प्रस्तूयताम् | **(५)**

**अथवा**

स्फोटविषयकं तार्किकमतं प्रदर्श्यताम् |

**प्रश्न:-६** व्यञ्जना क: पदार्थ: ? इति ग्रन्थोक्तदिशा विवेच्यताम् |
**(१०)**

**अथवा**

चतुर्विधवाचां ग्रन्थोक्तरीत्या वर्णनं विधेयम् |

## चतुर्थान्विति:

**प्रश्न:-७** कानि शाब्दबोधसहकारिकारणानि ? इति उल्लिख्य आकाङ्क्षास्वरूपं विवेचयत |
**(५)**

**अथवा**

स्वाधीतग्रन्थदिशा योग्यता निरूपणीया |

**प्रश्न:-८** स्वाधीतग्रन्थानुसारं तात्पर्यनिरूपणं कर्तव्यम् |
**(१०)**

**अथवा**

'गिरिर्भुक्तमग्निमान् देवदत्तेन' इति वाक्यं कस्मात् अनुपपन्नं भवति इति स्पष्टयत |

**प्रश्न:-९ निम्नलिखितेषु प्रश्नेषु केषाञ्चित् दशप्रश्नानां लघूत्तरं देयम |**
**(१०)**

(१) वर्णस्फोटस्य कति भेदा: ?
(२) अष्टसु स्फोटेषु मुख्य: स्फोट: क: ?
(३) न्यायभाष्यकारेण वाक्यस्य किं लक्षणं प्रोक्तम् ?
(४) शास्त्रप्रक्रियानिर्वाहक: स्फोट: क: ?
(५) केषां मते 'स्वशक्यसम्बन्धो लक्षणा' विद्यते ?
(६) "गौणी" कस्या: भेदो वर्तते ?
(७) अगृहीशक्तिकस्य किं न भवति ?
(८) वृत्ति: कतिविधा ?
(९) स्वसमभिव्याहृतपदनिष्ठशक्तिव्यञ्जकत्वं किं भवति ?
(१०) प्रसिद्धा अप्रसिद्धा चेति कस्या: भेदौ स्तः ?
(११) नाभिसंस्थिता का वाणी भवति ?
(१२) सकलजनश्रोत्रग्राह्या वाक् का भवति ?
(१३) का वाक्यसमयग्राहिका ?
(१४) योग्यताया: किं लक्षणम् ?
(१५) 'प्रकृतान्वयबोधाननुकूलपदाव्यधानम्' कस्या: लक्षणमस्ति ?

***